JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2014-15)

BEQG2D4

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - नवमी

समय : होरात्रयम् | पूर्णाङ्कः 90

निर्देशाः

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | 10 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | - | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | - | 35 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - 10

अयं संसारः सत्ये प्रतिष्ठितः। यतः यथा तस्य चिन्तनम् भवति तथा तस्य कथनम्, आचरणं च सत्यम् इति भवति। तस्मात् विपरीतं तत् असत्यम् भवति। सत्यं नरस्य सामान्या प्रवृत्तिः। असत्यं तु असामान्या निन्द्या च प्रवृत्तिः। अस्य तु प्रमाणं बालाः, सत्त्वगुणप्रधाना मुग्धमुग्धा ग्रामीणाः, पर्वतीयाश्च जनाः। बालः यद् यथा चिन्तयति, पश्यति करोति च, तद् तद् तथैव अपृष्टो वा अन्यं कथयति। न तत्र असत्यं वदति। इत्थमेव सत्त्वप्रधानो ग्रामीणो जनः अपि आचरति।

I. एकपदेन उत्तरत।

(i) सत्यं कस्य सामान्या प्रवृत्तिः?

(ii) अयं संसारः कस्मिन् प्रतिष्ठितः?

II. पूर्णवाक्येन उत्तरत।

(i) सत्यम् किम् भवति?

(ii) बाल: किम् कथयति?

III. **यथानिर्देशम् उत्तरत –**

(i) कथयति इति क्रियाया: कर्तृपदम् किम्?

(क) यथा (ख) बाल:

(ग) अपृष्टो (घ) कथयति

(ii) अनृतम् इति पदस्य अत्र किं पर्यायपदम्?

(क) विपरीतम् (ख) सामान्या

(ग) असत्यम् (घ) निन्द्या

(iii) प्रशंस्या इति पदस्य अत्र किं विलोमपदम्?

(क) निन्द्या (ख) प्रवृत्ति:

(ग) सामान्या (घ) इत्थमेव

(iv) प्रवृत्ति: – अस्य पदस्य विशेषणं किम्?

(क) सत्यं (ख) नरस्य

(ग) सामान्या (घ) असत्यम्

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्ड: 'ख'

## रचनात्मकं-कार्यम् - ( 15 अङ्का: )

2 **कन्याशिक्षाया: महत्त्वं वर्णयन् कन्याया: मातरं प्रति पत्रं मञ्जूषायां दत्तै: पदै: पूरयित्वा पुन: उत्तरपुस्तिकायां लिखत।** 5

परीक्षाभवनम्

तिथि: ..........

__(i)__ मातृपादा:,

सादरं नमोनम:।

अत्र कुशलं तत्रास्तु। ___(ii)___ इदं निवेदनम् अस्ति यत् मम मैट्रिक-परीक्षाफलम् अद्यैव __(iii)__। मया प्रथमा श्रेणी लब्धा इति __(iv)__ भवती अतीव प्रसन्ना भविष्यति। अधुना अहम् उच्च-शिक्षालाभाय महाविद्यालये प्रवेशार्थं __(v)__ कामये। आधुनिके __(vi)__ युगे पुरुषा: उच्चशिक्षां लब्ध्वा __(vii)__ सम्यक् वोढुं यतन्ते। आत्मानं योग्यां __(viii)__ स्थापयितुम् स्त्रिय: अपि सुपठिता: योग्या: च भवेयु: इति अनिवार्यम्। आशासे भवती मम इच्छाम् उचितां मत्वा __(ix)__ शिक्षार्जनस्य निजानुमतिं अवश्यमेव __(x)__। पितृमहाभागाय मम प्रणामा:।

भवत्प्रिया पुत्री,

गीता

**मञ्जूषा**

जीवनभारं, महाविद्यालये, जीवनसंगिनीं, प्रदास्यति, पूजनीया:, ज्ञात्वा, सेवायाम्, वैज्ञानिके, प्राप्तम्, भवदनुमतिम्।

2 8 5 4 1 9 10 6 3 7

3 चित्रम् आधृत्य मञ्जूषायाः सहायतया संस्कृते पञ्चवाक्यानि लिखत। 10



मञ्जूषा -

वनमहोत्सवस्य, पुष्पाणि, प्रतिवर्षं, वृक्षारोपणं, वृक्षाः, शुद्धः, जलपात्रेण, जलं, पर्यावरणदृष्ट्या, वर्षाकाले, खगाः, बालिका, प्रसन्नाः, यच्छति, सुन्दराणि, मोदन्ते।

अथवा

स्वविद्यालये भवान् प्रार्थनासभायां प्रथमवारं वार्ताः पठति। स्वमनोदशां वर्णयन् पञ्च वाक्यानि संस्कृतेन मञ्जूषापदसहायतया लिखतु। 10

मञ्जूषा

प्रथमवारम्, शिक्षकस्य आदेशः,मुखं शुष्यति, चित्तं, व्याकुलम्, हस्तौ कम्पेते, शिक्षकस्य संकेतः, अतीव, साधु, शोभनम्, आत्मविश्वासः, जागृतः, छात्राः, करतलध्वनिम्, पितरौ, प्रसन्नौ

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

4 अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत - 4

(i) ऊ - वर्णस्य उच्चारणस्थानम् लिखत।

(ii) आशीर्वादः - इति पदे तालव्यं वर्णं लिखत।

रिक्तस्थानं पूरयत -

(iii) पूरयत – प् + ऊ + र् + अ + य् + अ + ________ + अ

(iv) क् + आ + र् + य् + अ + म् = ________

5 अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – 5

(i) गुरु + उपदेशः कार्यं साधयति।

(अ) गुरुपदेशः (ब) गुरूपदेशः

(स) गुरोपदेशः (द) गुरौपदेशः

(ii) एका बलाका तस्य + उपरि विष्ठाम् उदसृजत्।

(अ) तस्युपरि (ब) तस्यूपरि

(स) तस्यपरि (द) तस्योपरि

(iii) बालकः एतच्चित्रम् पश्यति।

(अ) एत + चित्रम् (ब) एतच् + चित्रम्

(स) एतत् + चित्रम् (द) एत + च्चित्रम्

(iv) काष्ठात् + अग्निः मथ्यमानात् जायते।

(अ) काष्ठातग्निः (ब) काष्ठात्ऽग्निः

(स) काष्ठादग्निः (द) काष्ठाताग्निः

(v) दन्तैः + हीनः शिलाभक्षी परपादेन गच्छति।

(अ) दन्तैहीनः (ब) दन्तैरहीनः (स) दन्तैर्हीनः (द) दन्तैंहीनः

6 प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत – 5

(i) जनाः ______ हिताय सर्वस्वम् समर्पयेयुः।

(अ) देशम् (ब) देशात्

(स) देशाय (द) देशस्य

(ii) तापसाः ______ हवनं कुर्वन्ति।

(अ) अग्निः (ब) अग्नये

(सँ) अग्नौ (द) अग्निम्

(iii) त्वं ______ कदा आगच्छः ?

(अ) पाठशाला (ब) पाठशालायै

(स) पाठशालया (द) पाठशालायाः

(iv) ________ स्वबालस्य प्रगत्यै प्रयत्नं कुर्वः।

(अ) अहम् (ब) वयम्

(स) आवाम् (द) आवाभ्याम्

(v) इदम् ______ मम अस्ति।

(अ) गृहः (ब) गृहम्

(स) गृहे (द) गृहाय

7 उचितधातुरूपाणि चित्वा रिक्त-स्थानानि पूरयत। 5

(i) सत्यस्य सर्वत्र विजयः ___। धैर्येण कार्यं कुरु।

(अ) भविष्यति (ब) भविष्यतः

(स) भविष्यसि (द) भविष्यामि

(ii) वयम् देशभक्ताः ___।

(अ) सन्ति (ब) स्थ

(स) स्मः (द) स्थः

(iii) परिश्रमिणः जनाः सफलताम् ___।

(अ) लभते (ब) लभध्वे

(स) लभेते (द) लभन्ते

(iv) सूर्यस्य प्रकाशेन तमः ___।

(अ) अनश्यन् (ब) अनश्यत्

(स) अनश्यताम् (द) अनश्यः

(v) पुत्रः मातरं ___।

(अ) सेवते (ब) सवेते

(स) सेवसे (द) सेवन्ते

8 कोष्ठकगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि पूरयत। 5

(i) (इन्द्र)______ स्वाहा।

(ii) (नगर) ______ बहिः एकम् वनम् अस्ति।

(iii) (पर्वत) ______ अधः नदी बहति।

(iv) (वन)______ परितः वायुमण्डलम् स्वच्छम् अस्ति। वनस्य

(v) राधा (वीणावादन) ______ कुशला अस्ति।

9 रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत - 6

(i) त्वम् पुराणं पठ्+तुमुन् ___ इच्छसि।

(ii) मातापितरौ प्र+नम्+ल्यप् ___ पुत्रः विदेशं गच्छति।

(iii) कमला <u>धाव्+क्त्वा</u> कन्दुकं गृह्णाति।

(iv) बालिका <u>प्रहस्य</u> अकथयत्।

(v) छात्रा दुग्धं <u>पीत्वा</u> गच्छति।

(vi) छात्रा किं <u>कर्तुम्</u> इच्छति?

## खण्ड : 'घ'

## पठित-अवबोधनम् - 35 अङ्काः

10 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

विप्रः कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति। ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत्। अत उच्यते -

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्"

**I. एकपदेन उत्तरत।**

(i) सहसा कां न विदधीत?

(ii) आपदां पदं किम्?

**II. पूर्णवाक्येन उत्तरत।**

ब्राह्मणः किमर्थं विषादम् अगच्छत्?

**III. यथानिर्देशम् उत्तरत -**

(i) 'पश्चात्' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(अ) यावत् (ब) कोपात्

(स) अनन्तरं (द) तावत्

(ii) 'सुस्थः' इति पदस्य किं विशेष्यपदं अत्र प्रयुक्तम्?

(अ) सर्पः (ब) बालकः

(स) विप्रः (द) व्यापादितः

11 **अधोलिखितम् पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -** 5

आदानस्य प्रदानस्य कर्तव्यस्य य कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।।

**I. एकपदेन उत्तरत।**

(i) कालः किम् पिबति?
(ii) कर्माणि कीदृशानि उक्तानि अत्र?

II. **पूर्णवाक्येन उत्तरत ।**
कालः कस्य रसम् पिबति?

III. **यथानिर्देशम् उत्तरत –**
(i) पिबति इति क्रियायाः कर्तृपदम् किम्?
(क) कालः (ख) रसम्
(ग) तद्रसम् (घ) क्षिप्रम्
(ii) शीघ्रम् इति पदस्य अत्र किं पर्यायपदम्?
(क) कर्मणः (ख) तद्रसम्
(ग) क्षिप्रम् (घ) अक्रियमाणस्य

12 **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** 5

आरुणिः – श्वेतकेतो! न्यग्रोधफलम् आहर।
श्वेतकेतुः – इदं भगवन्!
आरुणिः – अत्र किं पश्यसि?
श्वेतकेतुः – अणुतराणि इमानि बीजानि।
आरुणिः – एषु एकं बीजं भिन्धि।
श्वेतकेतुः – भिन्नम्।
आरुणिः – अत्र किं पश्यसि?
श्वेतकेतुः – न किञ्चन भगवन्।

I. **एकपदेन उत्तरत।**
(i) आरुणिः श्वेतकेतुं किम् आनेतुम् आदिशत्?
(ii) 'न किञ्चन भगवन्' इति कः कथयति?

II. **पूर्णवाक्येन उत्तरत।**
'एषु एकं बीजं भिन्धि' इति कः कम् आदिशति? बीजानि च कीदृशानि?

III. **उचितम् उत्तरं चित्वा लिखत –**
(i) 'आनय' इति पदस्य समानार्थकं किम् अस्ति?
(अ) इमानि (ब) आहर
(स) किञ्चन (द) भिन्नम्
(ii) 'बीजानि' इति पदस्य विशेषणपदं किम् अस्ति?
(अ) अणुतराणि (ब) एकम्
(स) भिन्नम् (द) एषु

13 **अधोलिखितपंक्तीनाम् उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत -** 4
(i) अणिम्नः स्थूलं जगत् उद्भवति।

(क) अणुभिः संसारस्य उत्पत्तिः भवति।

(ख) आत्मा निराकारः अस्ति। तस्माद् एव आत्मनः इदं दृश्यमानं जगत् उत्पन्नं भवति।

(ग) अणुसदृशैः वटबीजैः एव अस्य संसारस्य उत्पत्तिः जायते।

(ii) मार्गारब्धाः सर्वयत्नाः फलन्ति।

(क) मार्गे दैवयोगेन सर्वे यत्नाः फलन्ति।

(ख) ताः एव चेष्टाः फलदायिकाः भवन्ति याः उचितमार्गे सोद्देश्यं प्रारभ्यन्ते।

(ग) आरम्भे सर्वे यत्नाः मार्गे फलदायकाः भवन्ति।

(iii) अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।

(क) सततम् अगच्छन् अपि गरुडः शतं क्रोशान् गच्छति।

(ख) विनतायाः पुत्रः गरुडः शनैः गच्छन् अपि स्वगन्तव्यं न प्राप्नोति।

(ग) तीव्रगामी अपि गरुडः यदि न चलति तर्हि एकं पदमपि न सरति।

(iv) विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः।

(क) विद्यया हीनः जनः समाजे न शोभते।

(ख) विद्वान् जनः समाजे न शोभते।

(ग) निर्गन्धा किंशुका पुष्पेषु शोभन्ते।

14 **अधोलिखित-पद्यांशयोः अन्वययोः मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिम् कुरुत -** 4

(क) स जातो येन जातेन याति वंशः समुन्नतिम्।
परिवर्तिनि संसारे मृतः को वा न जायते।।

**अन्वयः** - स जातः येन __(i)__ वंशः समुन्नतिम् __(ii)__ (यतः) परिवर्तिनि __(iii)__ कः वा मृतः न __(iv)__ ।

(ख) स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।
स समाः शतमव्याधिरायुषा न वियुज्यते।।

**अन्वयः** - यः यथोद्दिष्टं __(v)__ सम्यक् __(vi)__ सः शतम् __(vii)__ अव्याधिः (भूत्वा) __(viii)__ न वियुज्यते।

**मञ्जूषा**

आयुषा, जातेन, अनुतिष्ठति, संसारे, स्वस्थवृत्तं, याति, समाः, जायते।
8 1 6 3 5 2 7 4

15 **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 4

(i) <u>पयोदानां</u> स्थितिः उच्चैः भवति। कम्

(ii) रामः <u>सत्यम्</u> अनुव्रतः। कम्

(iii) <u>विद्याहीनाः</u> न शोभन्ते। काः

(iv) भरतः रामस्य पादमूले वस्तुम् ऐच्छत्।

16 **अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत।** 4

(i) आरुणिः श्वेतकेतुम् वटबीजस्य अन्तः द्रष्टुम् अकथयत्।

(ii) गर्वान्वितम् श्वेतकेतुम् शिक्षयितुम् पिता तत्त्वज्ञानम् प्रतिपादयति।

(iii) पिता उवाच यत् वटबीजे सम्पूर्णः वटवृक्षः तिष्ठति।

(iv) महर्षेः आरुणेः पुत्रः श्वेतकेतुः अध्ययनार्थम् गुरोः समीपम् अगच्छत्।

(v) ततः वटफलस्य एकं बीजम् भेत्तुम् अकथयत्।

(vi) वेदान् अधीत्य श्वेतकेतुः गवान्वितः अभवत्।

(vii) वस्तुतः जगति आत्मा एव सत्।

(viii) पिता तम् वटफलम् आनेतुम् अकथयत्।

17 **( क ) अधोलिखितवाक्ययोः रेखांकितपदयोः कृते उचितम् अर्थं चित्वा लिखत।** 4

(i) मार्गारब्धाः सर्वयत्नाः फलन्ति।

| | |
|---|---|
| (अ) सर्वजनाः | (ब) सर्वकार्याणि |
| (स) परिश्रमः | (द) गमनागमनम् |

(ii) सहसा क्रियाम् न विदधीत।

| | |
|---|---|
| (अ) अधुना | (ब) सर्वत्र |
| (स) अकस्मात् | (द) तदा |

**( ख ) शब्दानाम् अर्थैः सह मेलनं कुरुत।**

| | | | |
|---|---|---|---|
| (i) | अधीत्य | – | ज्ञानम् |
| (ii) | विप्रः | – | दीनताम् |
| (iii) | श्रुतम् | – | पठित्वा |
| (iv) | दैन्यम् | – | ब्राह्मणः |